M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 287

Title: Chintamani

1277

InComplete

C

Chintamani : Title

: Author

: Editor

: Year, Vols.

S|C : Publisher

1277 : Remarks

साध्यमानार्थकपदयोः तत्रैकस्यान्वये एकस्य वैयर्थ्यात्

साध्यवद्भिन्नो यः साध्याभाववानिति कर्मधारये साध्याभाववत्त्वस्य अव्यावर्तकत्वेन वैयर्थ्यं अतः सप्तमीतत्पुरुषं व्याचष्टे इति साध्यवद्भिन्ने इति ननु साध्यवद्भिन्नेन समं वृत्तित्वस्यान्वयाभावात् यथाश्रुते वैयर्थ्यं इति वाच्यं अभेदेन साध्यवद्भिन्नान्विते साध्याभाववत्संबंधिनोऽवृत्तित्वान्वये साध्याभाववत्त्वस्य अव्यावर्तकत्वेन वैयर्थ्यात् अभेदेन साध्यवद्भिन्नयोरन्वितत्वस्यैव सम्यक्त्वात् इति ननु अधिकरणभेदेन अभावभेदपक्ष एव एतल्लक्षणं इति साध्यवद्भिन्नेवोऽभावः इत्येतावतैव सामंजस्ये साध्यपदवैयर्थ्यमिति वाच्यं [illegible] व्याप्यवृत्तित्वरूपविरुद्धधर्मसंसर्गेण द्रव्यवृत्ति

संयोगाभाव
वद्गुणवृत्ति

साध्यवद्भिन्ने यः साध्याभाववत्तद्वृत्तित्वमित्यर्थः

नि संयोगाभावस्यैव भिन्नत्वोपयोगेत् नतु घटत्वाभावादेरपि अधिकरणभेदेन भेदाभ्युपगमो मानाभावात् यदि च अभावमात्रस्यैव अधिकरणभेदेन भेद इति मतेनेदम् तथापि साध्याभाववत्त्व अभावत्वभावाभावसाधारणं पातं अन्यथा घटत्वाभाववान् पटत्वादित्य अभावसाध्यकभावभिन्नसाध्याभावस्य अप्रसिद्ध्याव्याप्तिः स्यात् तथा च साध्यवद्भिन्ने वर्तते यो द्रव्यत्वादिरूपो द्रव्यत्वाभावाभाववद्वृत्तिधूमादेर्वृत्तित्वसंभवेन असंभवोव्याप्तिर्वास्यात् अतः साध्येति साध्याभाववत्त्वं साध्यवत्ताग्रहविरोधितानियामकसंबंधेन तेन कालिकतयाऽवस्थस्य [illegible] वेदेशिक वि

श्रेणैवेतथासाध्येआ
मनादिहेतौनाव्याप्तिः॥

सिं·शि·भ·

लक्षणयोः पौनरुक्त्यमाशंक्याह साध्यमिति असामानाधिकरण्यं तदधिकरणाधिकरणत्वं तदधिकरणानधिकरणत्वं वा आद्ये सत्तावान् द्रव्यत्वादित्यादौ अव्याप्तिः समवायेन द्रव्यत्वानधिकरणाधिकरणत्वस्य सत्वात् तत आह यदधिकरणेति साध्यं असमानाधिकरणं यस्य स यत्र समानाधिकरणभिन्नस्य साध्यस्य यत्पदार्थसंबंधो लभ्यते तत्संबंधितं अधिकुक्षितिवेसतां यदि

नापीति साध्यं असमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं तत्वं साध्यानि
ष्ठासामानाधिकरण्यप्रतियोगित्वम् ॥ नापि साध्यासामानाधिकरण्यानधिकरणत्वं॥

निरुक्तिश्च अव्याप्तियत्वत्वतयोः रत्नसुगमादाह साध्यनिष्ठेति साध्यनिष्ठाभावप्रतियोगिवृत्तित्वनिरूपकाधिकरणतायाप्रतियोगित्वं साध्यनिष्ठाभावीयवृत्तित्वनिष्ठप्रतियोगितायां निरूपकतासंबंधेनावच्छेदकं यदधिकरणत्वं इति तथिति यावत् अत्यंसत्वादिस्वत्रद्रव्यत्वं साध्ये गुणवृत्तित्वाभावस्य सत्वात् साध्यनिष्ठाभावीयवृत्तित्वनिष्ठप्रतियोगिता संबंधेनावच्छेदको गुणवृत्तित्वस्य सत्तायां सत्त्वान्नातिव्याप्तिः ॥

एकत्रविशेषणत्वेनान्वितस्य अन्यत्रविशेषणत्वेनान्वयायोगात्

अत्रच साध्यवत्पदेन लक्षणया साध्यवत्त्वावच्छिन्नप्रतियोगिताको ऽभिधीयते तस्य च अन्यपदार्थैकदेशे भेदे ऽभेदेनान्वयः
घटेन इत्यादौ घटतदभावयोर्घटत्वावच्छिन्नप्रतियोगिताकत्वं संसर्गः ननु विशेषणीभूतघटत्वादेरभावांशे समं प्रतियोगि
तावच्छेदकत्वं संसर्गः तथा सति अभावो घटीयो घट इत्याकारकापत्तेः एवं घटत्वस्य इतरविशेषणतया पदार्थैकदेशतया च
अभावे ऽन्वयासंभवाच्चेति चेन्न घटत्वविशिष्टोपस्थापकपदसमभिव्याहृतनञ्पदस्य घटत्वावच्छिन्नप्रतियोगिताक
त्वसंबंधेन घटप्रकारकाभावविशेष्यकशाब्दबोधत्वं प्रत्येव अवच्छेदकं नीलसाकांक्षघटोपस्थापकपदसमभिव्याहृतनञ्
दस्य नीलघटत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन नीलघटप्रकारकाभावशाब्दत्वं तथा नीलो घटो नास्तीत्यादौ च घट
त्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन बाधाभावस्तात्पर्याभावात् विशेषणान्तरसाकांक्षत्वेन ज्ञातघटत्वादिविशिष्टो
पस्थापकपदसमभिव्याहृतनञ्पदत्वादिना घटत्वावच्छिन्नप्रतियोगिताकत्वेन बोधजनकत्वं वाच्यं घटादन्य इत्यादौ पंचम्
याऽवधित्वेऽवधिमत्त्वं वा शक्तिः तत्र घटत्वावच्छिन्नवृत्तित्वं घटत्वावच्छिन्ननिरूपितत्वं वा संबंधः एवं घटस्याभाव इत्यादौ
प्रतियोगित्वेऽनुयोगित्वे वा षष्ठ्यर्थे घटत्वावच्छिन्नवृत्तित्वादिकं संबंधः कंबुग्रीवादिमान्नास्तीत्यादौ चायोग्यत्वानि

श्चयश्चान्यानां भ्रमात्मकशाब्दबोधः घटतदभावयोर्घटत्वावच्छिन्नप्रतियोगितायाश्च संबंधित्वेन कंबुग्रीवादिमत्त्वावच्छिन्न
प्रतियोगितायाः असंबंधत्वात् न चात्र भ्रमो न कंबुग्रीवामत्त्वस्यावच्छेदकत्वे तस्याप्रकारत्वात् नापि कंबुग्रीवादिमत्त्वावच्छिन्न
प्रतियोगितासंबंधेन घटस्याभावेन तादृशप्रतियोगितायाः अलीकत्वादिति वाच्यं कंबुग्रीवादिमत्त्वावच्छिन्नत्वप्रतियोगिताभावांशे च संबं
धतयाभानात् अभावस्य घटत्वावच्छिन्नप्रतियोगिन्येव घटसंबंधितया कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितासंबंधेन घटासंबंधित्वेन
तेन संबंधेन घटप्रकारकत्वादिति भूतले घटपटौ न स्त इत्यत्र भूतलवृत्त्यभावे घटपटयोरुभयत्वावच्छिन्नप्रतियोगितासंबंधेनान्वय इति
स्तद् इति द्वित्वं तत्र प्रयोगसाधुतामात्रं दाराः सन्तीतिवत् भूतलवृत्त्यभावस्य घटपटयोरुभयत्वावच्छिन्नप्रतियोगितासंबंधेन घटपटयोरन्वयः
तथा च भूतलवृत्त्यभावीयौ घटपटौ स्त इत्यन्वय इति केचित् भूतलाधेयत्वस्य सप्तम्यर्थस्याभावो घटपटोभयत्वसामानाधिकरण्ये
न इत्यपि कश्चित् तन्न तत्सत्त्वेन सन्नानाद्रव्यत्वगुणत्वे न स्त इत्यत्र गत्यभावः घटपटौ न स्त इत्यादौ च घटत्वं पटत्वं उभयत्वं परस्पर
सामानाधिकरण्यापन्नप्रतियोगितावच्छेदकं न तु उभयत्वमात्रं केवलं घटत्वं पटत्वं वा यत्किंचिदुभयवत्यपि केवलघटवति भि
लपटवति वा घटपटौ न स्त इत्यभिमत्यापत्तेः तादृशप्रतियोगितावच्छेदकावच्छिन्नं च घटपटोभयं मेवं ततः तदुभयवत्येव न तादृशप्र
त्ययः एवं दंडी पुरुषो नास्तीत्यादावपि विशेषणविशेष्यभावापन्नं पुरुषत्वदंडोभयं इत्थं प्रतियोगितावच्छेदकं इत्यादिकमूह्यम् ।।६।।

सिं.शि.भ. लक्षणयोः पौनरुक्त्यमाशंक्याह साध्यमिति असामानाधिकरण्यं च अधिकरणाधिकरणत्वं तदधिकरणानधिकरणत्वं वा आद्ये सत्तावान् द्रव्यत्वादित्यादौ अव्याप्तिः समवायेन द्रव्यत्वानधिकरणाधिकरणत्वस्य सत्त्वात् तत्राह यदधिकरणेति साध्यं असमानाधिकरणं यस्य तत्र समानाधिकरणभिन्नस्य साध्यस्य यत्पदार्थसंबंधो लभ्यते तत्त्वं बाधितं अविवक्षितं वेत्यत आह यदि

नापीति साध्यं असमानाधिकरणं यस्य यदधिकरणानधिकरणं साध्यं तत्त्वं साध्यानि
ष्ठासामानाधिकरण्यप्रतियोगित्वम् ॥ नापि साध्यासामानाधिकरण्यानधिकरणत्वं ॥

तिकृश्चिव अत्रापि यत्त्वतत्त्वयोरननुगमादाह साध्यनिष्ठेति साध्यनिष्ठाभावप्रतियोगिवृत्तित्वनिरूपकाधिकरणताप्रतियोगित्वं साध्यनिष्ठाभावीयवृत्तित्वनिष्ठप्रतियोगितायां निरूपकतासंबंधेनावच्छेदकं यदधिकरणं तद्वृत्तित्वमिति यावत् द्रव्यं सत्त्वादित्यत्र द्रव्यत्वे साध्ये गुणवृत्तित्वाभावस्य सत्त्वात् साध्यनिष्ठाभावीयवृत्तित्वनिष्ठप्रतियोगिता ॥
संबंधेनावच्छेदको गुणवृत्तित्वस्य सत्तायां सत्त्वान्नातिव्याप्तिः ॥

ननु न प्रत्यक्षासंभवे यथाकाशाभावो गगनत्ववद्वृत्तित्वाभावे वा न यत्र रूपत्वाभाववद्वृत्तित्वाद्रूपाभाववानित्यनुमानं संभवतीत्याह नवेति तत्र अतीन्द्रियव्यभिचारिणि तत्र तद्वृत्तित्वम् तद्वृत्तित्वरूपत्ववद्वृत्तिभिन्नत्वस्य वाव्याप्यवृत्तित्वाभावादाकाशाभावादौ साधनाव्यापकत्वं रूपाभावादौ साध्यव्यापकत्वमिति भावः नन्वेवमतीन्द्रियसंयोगस्याव्याप्यवृत्तित्वानुपपत्तिः तथाप्रत्ययाभावात् अनुमानस्य तत्राप्रयोजकत्वादिति किंच अतीन्द्रियसाध्यके व्यभिचारानिर्णयप्रयुक्तत्वं अनुमानादिति यदि तदा तत्र एव तद्वृत्तित्वाभावोऽप्यनुमीयतां अप्रयोजकत्वशंकापरामर्शतुल्य

न च तदभाववद्वृत्तित्वेन तत्र तदनुमानम् तद्वृत्तिभिन्नत्वस्योपाधित्वात् किंच इदमिदानीमिति मतीतिनियामक
विशेषणताविशेषेणापि हेतुतायां सद्धेतो व्याप्तिः तेन संबंधेनाधिकरणे काले तेन संबंधेन साध्यवद्वृ
त्तित्वविरहेणाप्रसिद्धेः ॥ ५॥ ॥ ५॥ ५॥

त्वात् अत आह किंचेति इदमिति कालिकसंबंधेनेत्यर्थः कालो घटवान् पटादित्यत्र कालिकसंबंधेन पटाधिकरणे कालेन तेन संबंधेन साध्यवद्वृत्तित्वस्याभाववत्त्वेनाप्रसिद्धिरिति संबंधान्तरेण कालवृत्तेरपि कालिकसंबंधेनापि तद्वृत्तित्वात् अवृत्तावस्यत्वानवच्छिन्नत्वादिति भावः एतेन महाकालस्यापि तादात्म्येन स्व तयावत्त्वेनैव साध्यवद्वृत्तित्वाभाववत्त्वप्रसिद्धिरिति परास्तं तादात्म्यसंबंधस्यावच्छेदकत्वानियामकत्वात् ॥ ५॥

अथकेचित् साध्यवद्वृत्तित्वाभावेयद्रूपत्वाधिकरणावच्छिन्नत्वयद्रूपहेतुवृत्तित्वोभयाभावस्तत्त्वंविवक्षणीयम् तेनकालिकसंबंधेनहेतु
तायामवृत्तिनिष्ठसाध्यवद्वृत्तित्वाभावेहेत्वधिकरणकालावच्छिन्नत्वहेतुवृत्तित्वोभयाभावसत्त्वान्नाव्याप्तिः व्यभिचारिणिव्य
भिचारनिरूपकहेत्वधिकरणावच्छिन्नत्वहेतुवृत्तित्वोभयस्यतादृशवृत्तित्वाभावेसत्त्वान्नातिव्याप्तिरित्याहुस्तन्नवह्निमान्धूमा
दित्यत्रस्वावयवावच्छेदेनधूमवृत्तिसाध्यवद्वृत्तित्वाभावस्यैवरूपादिनिष्ठस्यहेत्वधिकरणावच्छिन्नत्वाद्व्याप्तिरितिहेत्वधिकर
णावच्छिन्नत्वस्याव्याप्यवृत्तित्वेनतदभावोपपादनेव्यभिचारिण्यतिप्रसंगात् अपरेतुस्वनिष्ठसाध्यवद्वृत्तित्वाभावानवच्छेदकहे
त्वधिकरणकत्वविवक्षयानदोषः नचवह्निमान्धूमादित्यत्रस्वनिष्ठंयत्सामानाधिकरण्यंरूपादिनिष्ठस्यतदभावस्यपर्वता
देरवच्छेदकत्वादव्याप्तिरितिवाच्यं स्वनिष्ठोयत्सामानाधिकरण्याभावस्तदनवच्छेदकत्वस्योक्तत्वात् यद्यपिधूमवृत्तितद
भावस्यापिरूपादिनिष्ठतदभावाभिन्नस्यावच्छेदकमेवहेत्वधिकरणंपर्वतादि तथापितदभावस्यरूपादिवृत्तित्वएवाव
च्छेदकंपर्वतादिनतुधूमादिवृत्तित्वइतिनोक्तदोषः नचपर्वतीयधूमस्यापिकालिकसंबंधेनमहानसवृत्तितयामहानस
पर्वतीयधूमेनवह्निमद्वृत्तित्वमितिप्रत्ययाद्धेतुवृत्तितदभावस्यावच्छेदकमेवमहानसादिकंहेत्वधिकरणमित्यव्याप्ति
रितिवाच्यं स्ववृत्तितदभावानवच्छेदकस्वाधिकरणकत्वस्यविवक्षितत्वात् अतएवपर्वतीयधूमवृत्तितदभावस्यानव

च्छेदकमेवहेतुतावच्छेदकसंबंधेनपर्वतीयधूमाधिकरणंपर्वतादिकमित्याहुः अत्रास्मद्गुरुचरणाः इदंपार्थिवपरमाणुत्वाभाववत्परमाणु
त्वाभाववादित्यादौव्याप्तिः अत्रपरमाणुत्वाभावस्यकालिकसंबंधेनाधिकरणकालादौनस्यदैशिकसंबंधेनापिवृत्तित्वेनतादृशसाध्य
वद्वृत्तित्वाभावस्यहेतुवृत्तित्वाभावात् परमाणौनकालिकसंबंधेनापितस्ययतःपरमाणोःकालोपाधित्वाभावात् नचमूर्तमात्र
स्यदिगुपाधित्वात्परमाणोर्दिगुपाधितयापरमाणुत्वाभावाधिकरणत्वात्तदवच्छेदेनपरमाणुत्वाभावेपार्थिवपरमाणुत्वाभाववद्वृत्ति
त्वाभावःप्रसिद्धइतिवाच्यं कालिकसंबंधवद्दैशिकसंबंधस्यगतिनियामकत्वाभावात् [illegible]नाममूर्तसंयोगादिनामिहेतिप्रत्ययानि
यामकत्वात् परमाणौपरमाणुत्वाभावस्यकस्यसंबंधानामभावात् यदिचकालिकसंबंधवद्दैशिकसंबंधोऽभ्युपगम्यतेतदापियत्रयस्य
यथाप्रतीतिस्तत्रैवतस्यतादृशसंबंधः कथ्यते नेहपरमाणौपरमाणुत्वाभावप्रतीतिरस्ति यदिचघटेघटत्वाभावइतिप्रती
त्यभावेपिइदानींघटत्वाभावइतिप्रतीत्यायथाघटेघटत्वाभावोविषयीक्रियते तथापरमाणौपरमाणुत्वाभावइतिप्रतीतिसंभावेयो
हपरमाणुत्वाभावइतिप्रतीतिःसापरमाणावपिदैशिकविलक्षणसंबंधेनयापरमाणुत्वाभावोविषयीक्रियतइत्युच्यते तथाप्याका
शत्वाभाववदात्माकाशसमवायत्वाभावादित्यादौव्याप्तिर्वज्रलेपापत्तेः आकाशस्याजन्यत्वेनामूर्तत्वेनचकेनापिसंबंधेनहे
तोरनधिकरणत्वादित्याहुः परंतुहेतुतावच्छेदकसंबंधेनहेतुमद्वृत्तिर्यः साध्यवद्वृत्तित्वाभावस्तदनवच्छेदकहेत्वधिकरणस्य
वाच्यम् तेनपार्थिवपरमाणुत्वाभाववदित्यादौपार्थिवपरमाणुत्वेनतादृशघटत्वाभावेवर्तमानस्यपार्थिवपरमाणुत्वाभा

भ॰चिंता॰शि॰

वद्वृत्तित्वाभावस्यानवच्छेदकमेवपरमाणुत्वाभावरूपहेत्वधिकरणभिन्नकोपिशेषः एवं आकाशाभाववदित्यादावपि न
चोक्तक्रमेणधूमादौ अव्याप्तिः हेतुतावच्छेदकसंबंधेनवृत्तिमद्वृत्तिर्यस्तदभावस्तदनवच्छेदकं हेतुतावच्छेदकसंबंधेनतस्यहे
तोरधिकरणमितिविवक्षितत्वात् भवति हि महानसावच्छेदेनपर्वतीयधूमस्तदनवच्छेदकं पर्वतीयधूमाधिकरणम् एवं
तादृशघटत्वाभावाधिकरणस्य हेतुभूतपरमाणुत्वाभावाधिकरणस्यानुपपत्तेः पार्थिवपरमाणुत्वाभाववद्वृत्तित्वाभावानव
च्छेदकत्वान्नात्राव्याप्तिः यद्वा स्वाधिकरणावच्छिन्नस्वावृत्त्यभाववत्त्वावच्छेदेन साध्यवद्वृत्तित्वप्रतियोगिकत्वाभाववत्त्वम् स्वा
धिकरणावच्छिन्नस्वावृत्त्यभावप्रतियोगितानवच्छेदकसाध्यवद्वृत्तित्वत्वं वा विवक्षितत्वं परमाणुत्वाभावादेस्स्वाधिकरणी कृत्वं
भूतपटावच्छिन्नघटवृत्तित्वाभाव पार्थिवपरमाणुत्वाभाववद्वृत्तित्वात् तदवच्छिन्नप्रतियोगिताकत्वाभावान्नाव्याप्तिः
व्यभिचारिवृत्त्यभावान्तरस्य साध्यवद्वृत्तित्वप्रतियोगिताकत्वाभावादवच्छेदकत्वेनेति [redacted]कालेधूमेनवह्नि
मत्संयुक्तमित्यत्र भवति तथापि हेत्वधिकरणमात्रावच्छिन्नहेतुवृत्त्यभावइति विवक्षणीयम् प्रकृते तु वह्निमद्वृत्तित्वाभा
वे उत्पत्तिकालस्यावच्छेदकत्वान्नाव्याप्तिः यत्तु उत्पत्तिकालावच्छेदेनधूमस्य पर्वतवृत्तित्वान्न तत्कालावच्छेदेन तत्र साध्य
वद्वृत्तित्वाभावइति तत्र घटो गंधवान् पृथिवीत्वादित्यादौ उत्पत्तिकालावच्छेदेन घटवृत्तौ पृथिवीत्वे तदवच्छेदेन गंधवद्

४ यद्यपि उत्पत्तिकालावच्छेदेन पर्वते वह्निमद्वृत्तित्वाभावो धूमेपिऽस्ति पर्वते उत्पत्ति ४

हेतुतावच्छेदकेति हेत्वधिकरणवृत्तिसमभवच्छेदकतायाम् हेत्वधिकरणावच्छेदेनेत्यर्थः तेनैव हेतुतावच्छेदकसंबंधेन वृत्त्याद्यव्याप्तिमाह
समवायेनेति अत्रतावपीत्यनेनान्वयः वह्निमानित्यत्रापि संयोगेनेत्यनुपपद्यते तन्मते जन्यत्वस समवायेन वह्नेः साध्यतायां संयोगेनहेतौ धूमादौ
अतिव्याप्तिवारणं संबंधान्तरणेति ननु आकाशादावेवतत्सिद्धिरितिसंबंधान्तरेनवर्तमानपर्यंतानुधावनव्यर्थमितिवाच्यं आकाशादेर्वृत्तित्वेन
तद्वृत्तिसाध्यवद्वृत्तित्वाभावे हेत्वधिकरणावच्छिन्नत्वासंभवात् यद्यपि पर्वतरूपादौ वह्निमत्संयुक्तत्वाभावस्य पर्वतादिदेशावच्छिन्नत्वं रूपादेः

केचित्तु साध्येति साध्यसामानाधिकरण्यं हेतुतावच्छेदकसंबंधेन हेत्वधिकरणे तेनैव संबंधेन साध्यवद्वृत्तित्वाभाव
श्च हेत्वधिकरणभिन्नत्वं अर्थः तेनधूमस्य स्वाश्रये संयोगेन वह्निमानितिसमवायेनाप्तत्वापि न क्षतिः ॥५ ॥५॰
तादृशाभावश्च संबंधान्तरेण वर्तमाने सुलभः

वृत्त्यापि संयुक्तत्वाभावेन स्वरूपेणैव तथात्वसंभवात् गुणाधिकरणावच्छिन्नस्य च एव अव्याप्यवृत्तितावच्छेदकनिरासाच्च तथापि पर्वते रूपे
न वह्निमत्संयुक्तत्वमिति प्रतीतिबलाद्विलक्षणमेवावच्छेदकत्वं पर्वतादेः स्वीकार्यमिति भावः ननु एवं कपाले समवेतघटस्य घटत्वस्य
वह्निमत्पर्वते संयोगेन वृत्तित्वाद् हेत्वधिकरणकपालावच्छेदेन तद्वृत्तित्वाभावस्य अव्याप्यवृत्तित्वात् अव्याप्यवृत्तितावच्छेदकत्वस्वीकारेपि न क्षति
रितिवाच्यं एतद्रूपवान् एतद्रसादित्यादौ एतद्रसाधिकरणावच्छेदेन तद्रूपवत्समवेतत्वाभावस्यैवैतद्रूपवत्समवेतत्वसंभवेनाव्याप्य
वृत्तित्वासंभवादिति ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ ५

४ अव्याप्यवृत्तेः यद्देशोधृतं तेनकेनापि लक्षणं अवच्छेदकं कालविधयावच्छेदकत्वं वा देशविधयावच्छेदकत्वं ४

सि॰ शि॰ ७

तादृशहेतुतावच्छेदकसंबंधेनहेत्वधिकरणे तादृशाभाववत्वं हेतुतावच्छेदकसंबंधेनसाध्यवद्वृत्तित्वाभाववत्वं ननुसाध्यवद्वृत्तित्ववति व्यभिचारिणिकथंतदभावः इत्यतः प्रतीतिंप्रमाणयति सत्तायामिति सत्वंसत्ताद्रव्यत्ववद्वृत्तित्वाभावविशिष्टसत्वेअतिरिक्तत्वादिति यद्यपिहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणइतिविवक्षया आवश्यकत्वादेवाव्याप्तिनिरासेविशिष्टस्यातिरिक्तत्वानुपन्याननिष्फलं अन्यथाद्रव्यस्पर्शवद्वृत्तत्वमूर्तत्वयोभयस्मादित्यादौअव्याप्त्यापत्तेः केवलद्रव्याधिकरणस्याकाशादेर्मूर्तत्वादिनिरूपं

व्यभिचारिणस्तद्व्यभिचारानिरूपकाधिकरणएवतादृशाभाववत्वं सत्तायांगुणेनद्रव्यत्वसामानाधिकरण्यमित्यनुभवात् नचैवंविशिष्टसत्वेऽव्याप्तिः विशिष्टस्यानतिरिक्तत्वात् अनतिरिक्तेतुविशेषणविशिष्टसंबंधस्यैवपरंपरयाव्याप्यत्वात् केवलान्वयिनिचाव्याप्तेरभिधानंतुद्वितीयलक्षणाभिप्रायेणेत्याहुः॥

वद्वृत्तित्वावच्छेदकत्वात्तथापिसार्वभौममतेविशिष्टनिरूपकाधिकरणतायाअतिरिक्तायाअनभ्युपगमेनगुणादेरपिविशिष्टसत्ताधिकरणत्वं इत्यभिप्रायेणविशिष्टस्यअतिरिक्ताभ्युपगमेनैवसर्वसामंजस्यमितिकुतस्तथाविवक्षणीयमित्यभिप्राय[illegible]नपाभिधानात् नचात्रमूर्तत्वमूर्तत्वयोरव्याप्तिः उभयत्वस्यापेक्षाविशिष्टापरत्वस्वरूपत्वेनआकाशादिरतिभूतत्वमूर्तत्वादेरुभयान्वत्वादिति विशिष्टस्यानतिरिक्तत्वंसार्वभौममतइत्युपन्यस्तं नतुप्रकारान्तरेणाव्याप्तिनिरासएवनभवतीतितथोक्ताभिदि

द्वितीयलक्षणेतिवैयधिकरण्यपदंभूम
ध्येसाध्यवच्छेदकस्यघटकत्वान्तरप्रसिद्ध्येवा
व्याप्तिरितिभावः ॥ ५ ॥ ५ ॥

द्रव्यत्वेनगुणेइतिद्रव्यत्वस्यगुणाद्विरतितत्वेनगुणावच्छेदेनतादृशवृत्तित्वाभावस्यासंभवात्तादृशवृत्तित्वाभावस्यासामानाधिकरण्यावच्छेदकत्वाभावस्यैवविषयत्वादितिनतुतादृशप्रतीत्यासामानाधिकरण्यस्यैवप्रतियोगित्वंविषयीक्रियतेनतदवच्छेदकत्वस्येत्यतआह परंपरासंबंधेनेति स्वनिरूपकयावदाश्रयत्वरूपस्वावच्छेदकत्वसंबंधेनद्रव्यत्वसामानाधिकरण्यं द्रव्य एववर्तते नगुणइति

तच्चित्यंच सत्तायांगुणेनद्रव्यत्वसामानाधिकरण्यमितिप्रतीतिर्हि द्रव्यत्वेगुणे नष्ठिवत्ति सामानाधिकरण्यनिमित्तप्रतीतिवत् सत्तानिष्ठद्रव्यत्वसामानाधिकरण्यावच्छेदकत्वस्यपरंपरासंबंधेनसामानाधिकरण्यस्यबाधाद्गुणेवगाहनेनतुसत्तायामिवद्रव्यत्ववत्ताभावम्

गुणेतादृशसंबंधेनतदभावस्वत्वमितिभावः ॥ ५ ॥ ५ ॥ ५ ५॥५

सिं. टी. भ.

ननुद्रव्यत्वशालित्वाभावाभावोद्रव्यशालित्वंनद्रव्यत्वाभाववत्तानीतिप्रत्ययस्यविषयः नतुव्याप्यत्वमन्येनेतिकुतोविरोधः द्रव्यशालित्वाभाववद्वृत्तेरुत्स्वस्य
स्वसिद्धत्वमित्यतआह, द्रव्यशालित्वाभावइति ननुद्रव्यशालित्वाभावेनसत्ताशालित्वमितिप्रतीत्याद्रव्यशालित्वाभावेनसत्ताशालित्वाभावोविषयी
क्रियते तत्स्यगुणावच्छेदेनसत्ताशालित्वे तयाद्रव्यावच्छेदेनसत्ताशालित्वाभावोनविरुध्यतइतिवाच्यं विरुद्धस्वभावयोर्भावाभावयोरेकत्रप्रती
तेरवच्छेदकभेदमादायैवसंभवात् प्रकृतेनगुणद्रव्यादिरूपावच्छेदकाप्रतीतावपिद्रव्यशालित्वाभावेनसत्ताशालित्वमितिप्रत्ययात् नन्वेवंसं[illegible]

सत्तानद्रव्यशालित्वाभाववतीद्रव्यशालित्वाभावेनसत्ताशालिनीत्यादिसर्वजनसिद्धप्रतीतेर्निबाधितत्वात्, बाधकाभावात्
संयोगतदभावयोरवच्छेदकभेदेनैकत्रप्रतीत्यातदुभयोरेकत्रसिद्धिः अतीन्द्रियसाध्यकेऽतीन्द्रियेऽव्यभिचारिण्यतिप्रसंगाच्च ।।
तत्रसामानाधिकरण्याभावस्यप्रत्यक्षासंभवेनासिद्धेः

योगाभावोव्याप्यवृत्तिःस्यात् मूलेसंयोगइत्यादिसर्वमितिमूले संयोगावच्छेदकत्वाभावस्यैवविषयत्वमित्यस्यसुवचत्वादित्यतआह
बाधकाभावादिति तत्रसंयोगाभावोनद्रव्यवृत्तिरित्यन्यथासिद्धिभावः ननुद्रव्यवृत्तित्वाभावोऽपिसत्तावृत्तित्वमितिप्रत्यययोर्विवादइत्यतआह
अतीन्द्रियेति अन्यतरस्येन्द्रियकतायांकदाचित्साध्यवद्वृत्तित्वाभावस्यकदाचित्साध्यवद्वृत्तित्वेहेतुवृत्तित्वाभावस्याप्रत्यक्षसंभवात्
त्वमयत्रातीन्द्रियत्वापदानम् इदंगुरुत्ववदाकाशाभाववदित्यत्रत्यर्थः ॥ ६॥ ६॥ ५। ५॥ ६॥
अत्यंताभावप्रत्यक्षेप्रतियोग्यधिकरणोभययोग्यतायास्तंत्रंनियमः

ननुवह्निमान्धूमादित्यादौअयोगोलकीयवह्नौपर्वतीयवह्नौमहानसवृत्तित्वाभावस्यसत्त्वात्तादृशसाध्यनिष्ठाभावप्रतियोगितावत्वनिरूपकंअधि
करणमहानसंतद्वृत्तित्वाभावस्यधूमेसत्त्वात् अव्याप्तिः किंतुसाध्यनिष्ठसामानाधिकरण्यंतुस्यद्वृत्तित्वंसाध्यतावच्छेदकसंबंधेनबोध्यं अन्यथा
स्फरखवान्आत्ममहाकालान्यतरत्वादित्यादौअतिव्याप्तिः तथाचसंयोगेनद्रव्यसामान्यस्यसाध्यतायांसमवायेनहेतौद्रव्यत्वेऽव्याप्तिः तत्र
तत्रसंयोगेनगुणादिवृत्तित्वस्याप्रसिद्धतयासाध्यनिष्ठसामानाधिकरण्यप्रतियोगित्वस्यगुणत्वादौऽप्रसिद्धिरित्यतआह, साध्यनिष्ठाधेय

साध्यनिष्ठाधेयत्वानिरूपकाधिकरणवृत्तित्वमितियावत् तस्याधिकरणत्वमित्यर्थः साध्यवद्भिन्नस्यचसाध्य
निष्ठाधेयत्वानिरूपकत्वाद्वैतंतेनातिप्रसंगः ।।

त्वेति साध्यनिष्ठाधेयत्वंसाध्यतावच्छेदकसंबंधेनवाच्यं तेनस्फरखवान्आत्ममहाकालान्यतरत्वादित्यादौसंबंधसामान्येनसुखवान्
ष्ठाधेयत्वानिरूपकाधिकरणगगनादौवृत्तित्वेनातिव्याप्तिः समवायेनवह्निनिष्ठाधेयत्वानिरूपकाधिकरणपर्वतादिवृत्तौधूमेनाव्याप्तिर्वा
वृत्तिमत्त्वमपिहेतुतावच्छेदकसंबंधेनबोध्यं तेनसंयोगेनवह्निनिष्ठाधेयत्वानिरूपकधूमावयवसमवेतधूमेनाव्याप्तिः ॥ ६ । ८ । ६॥

हेतुता॰

नन्वेवं सत्तावान् द्रव्यत्वादित्यत्र समवायेन हेतोर्द्रव्यं यत्र तद्भिन्नत्वसंयोगेन हेतोर्घटेऽव्याप्तिः समवायेन साध्यनिष्ठाधेयत्वानिरूपकाधिकरणे सामा-
सि.शि.भ.९ न्यगुणादौ संयोगसंबंधेन हेतुतावच्छेदकसंबंधेन समवायेन संयोगेन स्वरूपासिद्धेरत आह साध्यनिष्ठेति अत्र व्यापकतावच्छेदकसंबंधेन तद्धिकरणत्वावच्छिन्ना-
भावत्वेन वाच्या तेन वह्न्यधिकरणतात्वावच्छिन्नाभावस्य प्रमेयत्वादिना साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वेपि न क्षतिः आर्द्रेंधन-
प्रभववह्न्यधिकरणतात्वाभावस्य तादृशाधिकरणत्वव्यापकत्वादाह सामान्येति वह्न्यधिकरणतासामान्यसामान्योगोल्लेखयत्वह्न्यधिसाधरण

साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकाभावप्रतियोग्यधिकरणतासामान्यकत्वमिति तु निष्कर्षः तेन स-
त्तावान् द्रव्यत्वादित्यादौ न दोषः साध्यवैयधिकरण्यं साध्यवद्भिन्नाधिकरणत्वं ॥ साध्यवैयधिकरण्यानधिकरणत्वं वा·

स्य तादृशप्रतियोगित्वाभावान्नातिव्याप्तिरिति साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकतावच्छेदकसंबंधानिरूपितसंबंधतताव-
च्छेदकावच्छिन्नाधिकरणतात्वावच्छिन्नाभावत्वकत्वमिति तु निष्कर्षः तेन आसज्जरातिधर्मावच्छिन्नप्रतियोगिताकस्य वह्न्यधिकरण-
ताभावस्य धूमनिष्ठाधेयत्वानिरूपकाधिकरणत्वव्यापकत्वेपि नाव्याप्तिः अत्र व्यापकतायां प्रतियोगिवैयधिकरण्यं न निविष्टं
तेन संयोगेन वह्न्यधिकरणतस्याभावप्रत्ययतातदभावस्य केवलान्वयित्वेपि नातिव्याप्तिः ॥ छ॥ छ॥ छ॥ छ॥

अनातिप्रयोजनकतयेति हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणस्याभावे घटत्वे हेतुतावच्छेदकावच्छिन्नाभावस्य अनिवेशात् यथासांनिवेशे वैय-
र्थ्येपि अनातिप्रयोजनकत्वादित्यर्थः साध्यअधिकरणानधिकरणं यस्य तत्साध्यअधिकरणं तद्भावः साध्याधिकरणानधिकरणत्वं तदभावः
तस्मन्नर्थस्य तद्धितानार्थमाविर्योगाद्युसतिविशेषस्यात् नञ्चस्यत्यासाहाद्वितीयेपि समत्वप्रतियोगि वस्तुतस्तु घटानधिकरणं भूतलं
इत्यादौ भूतले घटाधिकरणत्वावच्छिन्नभेदप्रकारतया भासते नञ्च अनधिकरणेत्यत्र अधिकरणपदं घटपदसमभिव्याहारबलाल्लक्षणया

तत्साधिकरणत्वाशस्य अनतिप्रयोजनकतयात्र प्रत्यायद्दृष्टमेकोक्तानूद्युदृष्यति तदुभयमपीति साध्यैसादेः सा-
ध्यैयदधिकरणानधिकरणत्वाभावः साध्यस्य यदनधिकरणं तद्वृत्तित्वाभाव इत्यर्थः ॥ तदुभयमपि साध्यानधिकरणानधिकरणत्वं ।

यंस् अन्यथा घटपदेन समं अनधिकरणपदस्य षष्ठीतत्पुरुषसमासे घटसंबंध्यनधिकरणं स्यात् तथा च बाधः अधिकरणत्वाव-
च्छिन्नभेदस्य भूतले अभावात् अन्यथापि तावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्य कुत्रापि निवेशलभ्यतया अधिपदेन घटाधिकरणत्वावच्छिन्न-
भेदस्य प्रत्यायितुमशक्यत्वात् एवं प्रतियोग्यनधिकरणेत्यादौ प्रकृतेपि एवं रीत्यानुसंधेया ॥ छ॥ छ। छ॥

चिंता·टि·४

साध्यनिष्ठाधेयत्वानिरूपकत्वं हि साध्यनिष्ठाधेयत्वानिरूपकत्वसामान्याभावो यत्किंचित्साध्यनिष्ठाधेयत्वानिरूपकत्वं वा आद्ये केव
लान्वयिनीति केवलान्वयिसाध्यकेऽव्याप्तिरित्यर्थः अथास्मिन्हेतुं स्फुरयति साध्यनिष्ठेति द्वितीयेन नेति वह्निमान्धूमादित्यादौ अव्याप्तेदोषांत
रमाह क्वचिदिति गुणान्यत्वविशिष्टसत्तावान् जातेः इत्यादौ सत्तारूपसाध्यनिष्ठानिरूपकत्वस्य सामान्यादौ सत्त्वेन तत्र आत्माधिकर
णत्वाभावस्य सत्त्वादिति भावः ननु केवलान्वयिनीति यद्यपि सत्तावान् द्रव्यत्वादित्यादौ व्याप्तिः तथापि साध्यवद्भिन्ने यदधिकर

तत्र केवलान्वयिनि साध्यनिष्ठाधेयत्वानिरूपकाधिकरणाप्रसिद्ध्या नानाव्यक्तिकसाध्यके च साध्यव्यक्तिनिष्ठा
धेयत्वानिरूपकत्वं साधनाधिकरणव्यक्त्यन्तरस्य सत्त्वादव्याप्तिः क्वचिद्व्यभिचारिण्यतिव्याप्तिश्च यद्वा द्वितीये च साध्यव
त्यधिकरण्ये यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताको भेदो ननु तत्र यत्किंचित्साध्यानधिकरणाधिकरणधूमेनाप्रसिद्धं॥
विवक्षितस्तदा केवलान्वयिन्यादि त्व यत्किंचित्साध्यवत्तद्व्यक्तिभेदस्तदा नानाधिकरणवृत्तिसाध्यके सर्वत्राव्याप्तिः॥

णत्वाभाव इत्युक्तेन स्व्याप्तिवारणसंभवेनातितन्नोक्तम् नानाधिकरणकेति एतद्दूषणानुपन्तसामान्याद्यादौ द्रव्यत्वावच्छिन्नसाध्य
वन्नेदस्य साध्यवति सद्भावेपि प्रतियोग्यवृत्तित्वस्य भेदविशेषणत्वेनाव्याप्तिर्न संभवतीति नानाधिकरणकेत्युक्तम् सर्वत्र अन्वयि
नि व्यतिरेकिणि च॥ ६॥ ६॥ ६॥ ६॥ ६॥ ६॥ ६॥ ६॥

तेन संबंधेन घटत्वाद्यवच्छिन्नप्रतियोगिताकप्रमेयसामान्याभावोपि बोध्यः पारिभाषिकमेवेत्येवकारेण योगानादरः सूचितः यदिति
पच्चपरं हेतुतावच्छेदकावच्छिन्नहेतुपरम् तेनात्ममात्मा घटान्यत्वे सत्यात्मघटसंयोगादित्यत्र हेतुसमानाधिकरणस्यात्म
त्वाद्यभावस्य स्वविशिष्टहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणाप्रसिद्ध्यापि नाव्याप्तिः ननु ज्ञानादिवृत्तेरात्मत्वाद्यभावस्य
विषयाश्रयसमवायादिसंबंधेनात्मवृत्तित्वात्स्वविशिष्टहेत्वधिकरणस्याप्रसिद्धिरिति वाच्यं विशिष्टप्रतीतिनि

ननु पारिभाषिकमेवाव्यभिचरितत्वम् ॥ तथाहि यत्समानाधिकरणाः साध्यतावच्छेदकावच्छिन्न
व्यापकतावच्छेदकप्रतियोगिताका यावन्तोऽभावाः प्रतियोगिसमानाधिकरणास्तत्त्वम् ॥ ६॥

यामकविशेषस्यैव संबंधत्वात् न चैतेन संबंधेनात्मत्वाभाववविशिष्टधीरस्ति अत एव स्फटिकादिभिन्नेसत्त्वापि लोहि
त्यस्य स्वाश्रयसंयोगेन संबंधः किंतु स्फटिका एवेति एतेनैककालीनानेकज्ञानविषयत्वादिना संबंधेन सर्वस्यैव स
र्वत्र संबंधेनाद्युत्समाधिकरणा इत्यस्यैवैयर्थ्यमिति प्रत्युक्तम् ननु साध्यसमानाधिकरणा इति कथं नोच्यताम् सत्ता
वान् आत्मत्वात् प्रमेयवान् आत्मत्वादित्यादौ गुणकर्मान्यत्वविशिष्टसत्ताव्यभास्य समवायावच्छिन्नप्रमेयाभावस्य च
तादृशस्य स्वविशिष्टहेत्वधिकरणप्रसिद्ध्याव्याप्तिरिति तन्नोक्तम् ॥ श्री ॥ श्री ॥ श्री श्री ॥ श्री ॥

अत्र च साध्यनिष्ठव्याप्यतासंबंधसामान्येन वाच्या तत्र समवायेन ज्ञानसाध्यके द्रव्यत्वादिहेतौ ऽतिव्याप्तिः विषयेण ज्ञानस्य केवलान्वयित्वेन केवलान्वयिनिष्ठप्रतियोगितायाश्च तद्व्यापकतावच्छेदकत्वेन तादृशाभावस्य प्रतियोगिसमानाधिकरणत्वादिति वाच्यं प्रतियोगिसामानाधिकरण्यघटकसाध्यतावच्छेदकसंबंधेन साध्यनिष्ठा या व्याप्यता तन्निरूपितव्यापकताघटकयावत्संबंधेन प्रतियोगिसामानाधिकरण्यस्यावश्यं विवक्षणीयत्वेनैवानतिप्रसंगात् समवायेन ज्ञानादिव्यापकस्य ज्ञानादेरभावस्य हेत्वधिकरणावच्छेदेन समवायेन प्रतियोगिसामानाधिकरण्याभावात् यद्यपि संयोगसमवायादिसंबंधत्वं नैकमन्यतमत्वेन संबंधानां प्रवेशे गौरवं यत्किंचित्संबंधेन साध्यनिष्ठव्याप्यताभिधाने च ऽ प्रमात्वाज्ञानादित्वत्रकालिकसंबंधेन तत्त्वस्य व्यापकं जन्यमहाकालान्यतरत्वं तदभावस्य हेतुसमानाधिकरणस्य प्रतियोगिनः समवायेनात्मत्वनिष्ठव्याप्यतानिरूपितव्यापकताघटकसंबंधाप्रसिद्ध्याऽव्याप्तिरिति विभाव्यं तेन तदा साध्यतावच्छेदकसंबंधेन व्याप्यता बोध्या एवं च साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकावच्छिन्नसाध्यवद्वृत्त्यभावप्रतियोगितानवच्छेदिका यदभावप्रतियोगिता तादृशाभाववानित्यर्थः तेन गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादौ द्रव्यत्वाद्यभावस्य तादृशस्य प्रतियोग्यसमानाधिकरणत्वान्नातिव्याप्तिः धूमवान् वह्नेरित्यादौ धूमाभावप्रतियोगितायाः स्वरूपसंबंधा

वच्छिन्नत्वात्किं स्वरूपाया धूमव्यापकतानवच्छेदकत्वेपि अयोगोलकान्यत्वाद्येकव्यक्तिनिष्ठप्रतियोगितायाः एव तथात्वादयोगोलकान्यत्वाभावादेः प्रतियोग्यसमानाधिकरणत्वेन नातिव्याप्तिः वह्निमान् धूमादित्यादौ घटत्वावच्छिन्नप्रतियोगिताकद्रव्यत्वाद्यभावमादाय लक्षणसमन्वयः घटत्वावच्छिन्नद्रव्यत्वावच्छिन्नद्रव्यत्वाभावप्रतियोगित्वेन घटो नास्तीत्यादिक्रमेण प्रतियोगितामात्रस्यैव व्यधिकरणतया साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वेनाप्रसिद्धिवारणाय साध्यवन्निष्ठाभावप्रतियोगिव्यधिकरणत्वं देयम् तदर्थश्च न प्रतियोगिसमानाधिकरणाभिन्नत्वम् गोत्वत्वेन गोत्वाभावादेरपि गोत्वत्वेन किमपि प्रमेयं नास्तीतिप्रतीतिसिद्धाभावस्य मते यत्येन तदात्मकतया प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः नापि प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणाभिन्नत्वं तदर्थः व्यापकत्वस्य संबंधाविशेषनियंत्रितया येन संबंधेन प्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणाभिन्नस्य साध्यवन्निष्ठाभावस्य प्रतियोगितानवच्छेदिका प्रतियोगिता स एव व्यापकताघटकः संबंधो वाच्यः तथा च संयोगेन द्रव्यत्वमपि वह्निव्यापकं स्यात् वह्निमन्निष्ठस्य संयोगेन द्रव्यत्वाभावस्य तेन संबंधेन द्रव्यत्वाधिकरणाप्रसिद्ध्या प्रतियोगिव्यधिकरण्याभावात् तथा च तेन संबंधेन द्रव्यत्वाद्यभावस्य प्रतियोगिसामानाधिकरण्याभावादसंभवति न च संयोगेन स्वप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणं यद्वह्निमत्त्वं संयोगेन द्रव्यत्वाभावे वर्तत एवेति वाच्यं ॥